# Guruprarthana Stotram

# ગુરુપ્રાર્થના સ્તોત્રમ્

## Document Information

Text title : Guruprarthana Stotram

File name : guruprArthanAstotram.itx

Category : deities_misc, gurudev, chandrashekharabhAratI

Location : doc_deities_misc

Author : chandrashekharabhAratI

Transliterated by : Aruna Narayanan narayanan.aruna at gmail.com

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : Sri Gururaja Sukti Malika

Latest update : January 1, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 13, 2022

*sanskritdocuments.org*

# ગુરુપ્રાર્થના સ્તોત્રમ્

પૃથ્વીમણ્ડલરાજમાનનૃપમૌલ્યાભાત્કિરીટોજ્જ્વલ-
 દ્રત્નાભાઞ્ચિતપાદયુગલશ્રીમદ્ગુરો સત્વરમ્ ।
ત્વત્પાદૈકશરણ્યમન્દમતયેઽમુષ્મૈ જનાય પ્રભો
 હસ્તાલમ્બનમાદરાદ્વિતર માં દુઃસંસૃતેસ્તારય ॥ ૧॥

શ્રીમચ્છઙ્કરદેશિકેન્દ્રરચિતે પીઠે જગદ્દેશિક
 ત્વાદૃક્ષાઃ શિવરૂપિણોઽખિલવિદો બ્રહ્મસ્થિતા વર્તિતુમ્ ।
યુક્તં કોઽહમતીવ મન્દધિષણો બાહ્યેષુ સક્તોઽધુના
 સ્થાતું તદ્ભગવાન્ભવાન્કરુણયા મામુદ્ધરત્વઞ્જસા ॥ ૨॥

નિત્યાનિત્યવિવેકવિરક્તિશમાદિમુમુક્ષુતાહીનમ્ ।
દૃષ્ટ્વા કૃપાર્દ્રદૃષ્ટ્યા મુક્ત્યધ્વનિ પથિકમાતનુષ્વ ગુરો ॥ ૩॥

જ્ઞાનેતરેષ્ટદાને ચતુરાઃ કલ્પદ્રુમણિમુખાઃ સન્તુ ।
લોકત્રયેઽપિ સત્યં જ્ઞાનદવસ્તુ ત્વયા વિના નાસ્તિ ॥ ૪॥

પાપીયાનિતિ મત્વા માં યદિ લોકૈકદેશિક ત્યજસિ ।
સર્વજનત્યક્તમિમં કો વા પરિપાલયેત્કૃપાજલધે ॥ ૫॥

ત્વત્પાદામ્બુજયુગલં હિત્વા નાન્યા ગતિર્હિ મે લોકે ।
ઇતિ મત્વા તવ ચરણૌ શરણં પ્રાપ્તોઽસ્મિ કરુણયા રક્ષ ॥ ૬॥

નાસ્તિક્યતમસિ લોકે સર્વજનાનાં હૃદમ્બુજાતાનિ ।
મલિનીકુર્વતિ ધર્મે પ્રાયો નષ્ટે સદાશિવો ભગવાન્ ॥ ૭॥

ગુરુરૂપેણ ધરાયામવતીર્યાખિલજનાનવન્વિપદઃ ।
ધિક્કૃતસૂર્યમહોભિર્નાસ્તિક્યતમો વિનાશ્ય દુર્વારમ્ ॥ ૮॥

કૃત્વાઽનેકામાનુષકાર્યાણિ જનૈઃ સમર્ચિતો નિખિલૈઃ ।
તદ્વિદિતશઙ્કરાંશઃ લેભે સ્વં ધામ ખલુ વિસૃષ્ટાઙ્ગઃ ॥ ૯॥

તત્તાદૃગ્મહિમાનં લોકાનુગ્રહનિબદ્ધદીક્ષમહમ્ ।
વૈરાગ્યદાનનિરતં શરણં કરવાણિ દેશિકં ભક્ત્યા ॥ ૧૦॥

યન્નૈસર્ગિકકરુણાલેશમનુપ્રાપ્ય માનવા જગતિ ।
સ્વીયાચારરતાઃ સ્યુસ્તં દેશિકવર્યમાદરાન્નૌમિ ॥ ૧૧॥

શ્રીમદ્દેશિકવર્યાન્વન્દેઽનુદિનં શિવાભિનવપૂર્વાન્ ।
સચ્ચિત્સુખરૂપાન્ સદ્વિદ્યાં દદતઃ સ્વપાદનમ્રેભ્યઃ ॥ ૧૨॥

ઇતિ શ્રીજગદ્ગુરુ શ્રીશૃઙ્ગેરીપીઠાધિપ શ્રીચન્દ્રશેખરભારતી
શ્રીપાદૈઃ વિરચિતા ગુરુપ્રાર્થના સ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Aruna Narayanan narayanan.aruna at gmail.com

---

*Guruprarthana Stotram*

pdf was typeset on March 13, 2022

Please send corrections to *sanskrit@cheerful.com*